# 11. एकादशः पाठः
## विद्यालयः

द्वितीया

एषः अस्माकं विद्यालयः । अस्माकं विद्यालयः विशालः अस्ति । अत्र पञ्चशतं छात्राः पठन्ति । विद्यालयस्य भवनं सुन्दरम् । विद्यालयः पर्वतस्य उपरि अस्ति । विद्यालयस्य वामतः उद्यानम् अस्ति । दक्षिणतः अपि उद्यानम् अस्ति । विद्यालयस्य पुरतः ध्वजस्तम्भः अस्ति । विद्यालयस्य पृष्ठतः वृक्षाः सन्ति ।

एषा अस्माकम् अध्यापिका रमा । एषा अस्मान् संस्कृतं पाठयति । सा कथां श्रावयति । पाठ्योपकरणानि दर्शयति । सुभाषितानि वाचयति । गीतानि अपि गायति । सम्भाषणम् अपि बोधयति । अस्माकं गणिताध्यापकः उत्तमतया गणितं बोधयति । सः उत्तरकथनार्थम् अस्मान् प्रेरयति । विनोदकणिकाः उक्त्वा सर्वान् हासयति ।

वयं विद्यालयारम्भसमये प्रार्थनाश्लोकान् वदामः । ततः प्रमुखवार्ताः शृणुमः। अनन्तरं स्वकक्षां गच्छामः । सायं पञ्चवादनपर्यन्तं वयं पाठान् पठामः । मध्याह्ने भोजनविरामसमये पाथेयं स्वीकुर्मः । सायं वयं क्रीडामः । क्रीडा आनन्दं ददाति । शक्तिम् अपि ददाति । अनुशासनं बोधयति । परस ्परमैत्रीं वर्धयति । गृहे वयं पाठान् पठामः । प्रश्नानाम् उत्तराणिलिखामः । श्लोकान् कण्ठस्थीकुर्मः । ततः स्वज्ञानं वर्धयामः । वयम् उत्तमाः छात्राः भविष्यामः ।

ध्यानेन पठन्तु - [table]

द्वितीयाविभक्तिरूपाणि

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| पुं. - | पाठम् | पाठौ | पाठान् |
| स्त्री, आ. - | कथाम् | कथे | कथाः |
| स्त्री, ई. - | लेखनीम् | लेखन्यौ | लेखनीः |
| नपुं. - | गीतम् | गीते | गीतानि |